# संस्कृत-वार्ता:

दिनाङ्क :- 29.09.2024

प्रात: - 06:55

## अथ वार्ता: विस्तरेण

### मन की बात

प्रधानमन्त्री नरेन्द्रमोदी अद्य पूर्वाह्ने एकादशवादने स्वीय "मन की बात" इति कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं नूतनं संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी, दूरदर्शनम्, प्रधानमन्त्री-कार्यालयः, सूचनाप्रसारण-मन्त्रालयः इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं रात्रौ अष्टवादने भविता।

### प्रधानमन्त्री-महाराष्ट्र-परियोजना

प्रधानमन्त्री नरेन्द्रमोदी अद्य महाराष्ट्रे द्वयाधिकैकादशसहस्र-कोटिरूप्यकाणां विविधपरियोजनानां उद्घाटनं राष्ट्राय समर्पणं च आभासीय माध्यमेन करिष्यति। सः जिलान्यायालयात् स्वरगेटपर्यन्तं पुणेमेट्रोरेलयानखण्डस्य उद्घाटनं करिष्यति, यस्मिन् पुणेमेट्रोरेलपरियोजनायाः प्रथमचरणस्य अपि समाप्तिः भविष्यति। प्रधानमन्त्री पुणेमेट्रो रेलयान प्रथमचरणस्य स्वरगेट-कटराज विस्तारस्य आधारशिला अपि स्थापयिष्यति, यस्य विकासः प्रायः पञ्चपञ्चाशदधिक-नवशतोत्तर-द्विसहस्र-कोटिरूप्यकाणां व्ययेन भविष्यति।

### जम्मूकश्मीरनिर्वाचनम्

जम्मूकश्मीरे विधानसभा-निर्वाचनस्य तृतीयाय अन्तिमाय च चरणाय प्रचाराभियानं अद्य सायं समाप्तिं यास्यति । जम्मूकश्मीरे एतस्मिन् अन्तिमचरणे चत्वारिंशत्-विधानसभा-क्षेत्रेभ्य: मङ्गलवासरे मतदानं भविष्यति। मतदातृन् आक्रष्टुं विभिन्नानां राजनीतिक-दलानां नेतार: जनसभा: पथप्रदर्शन्य: च कुर्वन्ति। तत्रैव हरियाणायां नवति: विधानसभासनेभ्य: मतदानं अक्टूबरमासस्य पञ्चम दिनाङ्के सुनिश्चितमस्ति। राज्येऽस्मिन् अपि प्रचाराभियानं तीव्रं जातम्। जम्मू-कश्मीरे भाजपेतिदलस्य वरिष्ठो नेता प्रधानमन्त्री नरेन्द्रमोदी च ह्यः समभाषयत् यत् जम्मू-कश्मीरस्य जनाः शान्तिं, स्वसंतानेभ्यः उत्तमं भविष्यं च इच्छन्ति इति। जम्मू-नगरे नैर्वाचानिकजनसमारोहं सम्बोधयन् असौ अघोषयत् यत् विधानसभा-निर्वाचनस्य अन्तिमयोः चरणयोः महत् मतदानम् अस्य प्रमाणम् अस्ति इति। अत्रावसरे श्रीमोदी न्यगादीत् यत्, काङ्ग्रेसदलं कदापि तेषाम् आदरं कर्तुं न शक्नोति ये देशाय म्रियन्ते। अयमस्ति काङ्ग्रेस्-दलस्य पक्षः , यः अस्माकं सैन्यपरिवारान् चतुर्दशकान् यावत् 'एकं पदं, एकं निवृत्तिवेतनम्' इति उत्कण्ठयत्। श्रीमोदी अवदत् यत्, चतुर्दशाधिकद्वि-सहस्र तमे वर्षे तस्य सर्वकारस्य निर्माणानन्तरं ओ. आर्. ओ. पी. इतीदं कार्यान्वयत् इति। असौ अग्रे ख्यापितवान् यत्, अद्यावधि सैन्यपरिवारेभ्यः विंशतिसहस्रकोट्यधिकैकलक्षं धनं प्रदत्तम् अस्ति। षोडशाधिकद्वि सहस्रतमे तमे वर्षे अस्मिन् दिने एव भारतं पाकिस्तानं विरुद्ध्य सर्जिकल्-स्ट्राइक् इति भीषणाक्रमणम् अकरोत् इति प्रधानमन्त्रिणा स्मृतम् ।

### जयशङ्करः

विदेशमन्त्री डॉ. एस जयशङ्करः उक्तवान् यत् पाकिस्तानस्य सीम्नः पारं आतङ्कवादस्य नीतिः कदापि सफला न भविष्यति तथा च कार्याणां परिणामः अवश्यमेव प्राप्स्यति । सः न्यूयोर्कनगरे संयुक्तराष्ट्रसङ्घस्य महासभायाः ऊनासीति तमे अधिवेशने सम्बोधयन् आसीत्।

### गुलवीरसिंहः

जापानदेशे विश्व-एथलेटिक्स-महाद्वीपीय-यात्रायाः पुरुषाणां पञ्चसहस्र-मीटर्-परिमितं धावने षड्विंशतिः वर्षीयः भारतीयः क्रीडकः गुलवीरसिंहः स्वर्णपदकं सम्प्राप्तवान्।

।। इति वार्ता:।।